संस्कृत-वार्ता:

1.10.2024

सायम् - 06:20

<u>मुख्यवार्ता:</u>

- जम्मू-कश्मीरे विधानसभानिर्वाचनस्य तृतीयान्तिमचरणाय मतदानस्य समाप्तिः। सायं पंच वादनपर्यन्तं पंचषष्ठी दशमलव अष्टचत्वारिंशत् प्रतिशतं मतदानं जातम्।

- हरियाणायां विधानसभानिर्वाचनाय प्रचाराभियानम् तीव्रगत्या प्रचलति।

- प्रधानमन्त्री नरेन्द्रमोदी अद्य नवदिल्ल्यां जमैकादेशीयेन समकक्षीयेण प्रधानमन्त्रिणा डॉ. एण्ड्रयू होल्नेस् इत्यनेन सह प्रतिनिधिमण्डलस्तरीयां वार्ताम् अकरोत्, उक्तवान् च भारतजमैका-देशयोः व्यापार: निवेशः च वर्धमानो विद्यते।

- क्रिकेट्-क्रीडायां भारतेन बाङ्गलादेशस्य विरुद्धं द्वावपि क्रिकेट-निकष-स्पर्धा विजिता। अद्य अपराह्ले कानपुर-नगरे द्वितीये निकष-क्रीडायां भारतेन बांगलादेश: सप्त स्तोभैः पराजित:।

- पेरुदेशस्य लीमानगरे प्रचल्यमाणायां (ISSF) इति अन्ताराष्ट्रीयलक्ष्यभेद स्पर्धासङ्घस्य कनिष्ठविश्व प्रतिस्पर्धायां पुरुषाणां स्पर्धायां भारतस्य पार्थराकेश माने इत्यनेन द्वे स्वर्णपदके समर्जिते।

<u>जम्मू-कश्मीर मतदान</u>

जम्मू-कश्मीरे विधानसभानिर्वाचनस्य तृतीयान्तिमचरणाय मतदानस्य समाप्तिः। सायं पंच वादनपर्यन्तं पंचषष्ठी दशमलव अष्टचत्वारिंशत् प्रतिशतं मतदानं जातम्। सर्वेषु मतदानकेन्द्रेषु विंशतिसहस्राधिकं मतदान-कर्मचारिण: नियुक्तास्सन्ति। कश्मीरसम्भागस्य सप्तजनपदेषु बारामूला-कुपवाड़ा-बांदीपोरा इत्येतेषु जम्मूसम्भागस्य च जम्मू-उधमपुर-कठुआ-सांबा-जनपदेषु षष्ट्यधिक-पञ्चसहस्रं मतदानकेन्द्राणि निर्मितानि। एतस्मिन् चरणे नवत्रिंशल्लक्षाधिकं मतदातार: पञ्चदशाधिक चतुश्शतं प्रत्याशिनां भाग्यनिर्णयं करिष्यन्ति।

ध्यातव्यम् अस्ति यत् प्रथमे चरणे एकषष्टि: प्रतिशतं द्वितीये चरणे च षड्पञ्चाशत् प्रतिशतं यावत् मतदानं समंकितम्।

## हरियाणासभा

हरियाणायां विधानसभानिर्वाचनाय प्रचाराभियानम् तीव्रगत्या प्रचलति । राज्ये नवति: विधानसभासनानां कृते मतदानं अक्टोबर् मासस्य पञ्चमे दिनाङ्के भविष्यति। विभिन्नराजनैतिकदलानां नेतारः स्वदलस्य प्रत्याशिनां समर्थने बहुविधसभाः, पथप्रदर्शन्यः च आयोजयन्ति। फरीदाबादस्य समीपस्थस्य पलवलमण्डलस्य गदपुरी टोलप्लाजा इत्यत्र अद्य भाजपेतिदलस्य वरिष्ठ: नेता प्रधानमन्त्री च नरेन्द्र मोदी नैर्वाचनिक-जनसभां सम्बोधयिष्यति। जम्मू-कश्मीर-हरियाणा-राज्ययोः विधानसभानिर्वाचनस्य मतगणना अस्मिन् मासे अष्टमे दिनाङ्के भविष्यति।

## प्रधानमन्त्री-जमैका

प्रधानमन्त्री नरेन्द्रमोदी अद्य नवदिल्ल्यां जमैकादेशीयेन समकक्षीयेण प्रधानमन्त्रिणा डॉ. एण्ड्रयू होल्नेस् इत्यनेन सह प्रतिनिधिमण्डलस्तरीयां वार्ताम् अकरोत्। एतस्यां वार्तायां भारत-जमैका-देशयोः मध्ये आङ्ककीय-अंता-संरचना, सांस्कृतिक-आदान-प्रदान-क्रीडा-क्षेत्रे सहकार्यादि क्षेत्राणां सहमतिपत्राणां आदान-प्रदानम् जातं। तत: पश्चात् संयुक्त-वार्ताहर चर्चायां प्रधानमन्त्री श्रीमोदी विश्वासं प्रकटितवान् यत् जमैकादेशस्य प्रधानमन्त्रिणः एषा यात्रा द्विपक्षीय-सम्बन्धेभ्यः अपि च समग्र-कैरिबियन-क्षेत्रेणाम् सम्बन्धेभ्यः च नूतनां ऊर्जां दास्यति।

प्रधानमन्त्री श्रीमोदी उक्तवान्, भारतजमैका-देशयोः व्यापार: निवेशः च वर्धमानो विद्यते। असौ अवदत् यत्, भारतं जमैकादेश: विकासयात्रायां सर्वदैव विश्वसनीयः प्रतिबद्धः च विकासस्य सहभागी अस्ति। सः अग्रे अवदत् यत् भारतं जमैकादेशेन सह प्रौद्योगिक सार्वजनिकसंरचना- लघूद्योग, जैवेन्धन-, नवाचार,- स्वास्थ्य, शिक्षा,- कृषि इत्यादिषु क्षेत्रेषु स्वानुभवं विनिमयिकर्तुं सज्जम् अस्ति।

संघठितापराध-मादक-द्रव्य-व्यापार-आतङ्कवाद-विषयान् प्रवदता प्रधानमन्त्रिणा उक्तं यत् एतानि सामान्यसमाव्हानानि सन्ति, उभौ अपि मिलित्वा एतेषाम् आव्हानानां सम्मुखिकर्तुं सहमतौ जातौ। श्रीमोदी अवदत् यत्, वैश्विकशान्तिं स्थिरतां च सुनिश्चित्य उभौ पक्षौ स्वप्रयत्नान् सततं करिष्यतः। प्रधानमन्त्रिणा मोदिना सूचितं यत् भारतप्रशासनेन नवदिल्ल्यां जमैका उच्चायोगस्य सम्मुखे स्थितस्य मार्गस्य नाम 'जमैकामार्ग' इति कर्तुं निर्णयः स्वीकृतः। सः अवदत् यत् भारतं जमैकादेश: च विशालसमुद्रेभ्य: पृथक् भवितुं शक्नुत: परन्व अस्माकं जनाः,

अस्माकं संस्कृतिः, अस्माकं इतिहासः च परस्परसम्बद्धः अस्ति। जमैकादेशस्य प्रधानमन्त्री स्वसम्बोधने अवदत् यत् अधुना प्रायः शताब्दद्वयं यावत् भारतीयाः जमैकादेशे स्वीयोपस्थितीं सुनिश्चितम् कृतवन्तः, येन जमैकादेशस्य विभिन्नक्षेत्राणां विकासे योगदानम् अभवत्। ततः पूर्वं जमैकादेशस्य प्रधानमन्त्री राजघट्टे राष्ट्रपित्रे महात्मागान्धिने श्रद्धांजलिम् अयच्छत्। डॉ. होल्नेस् इत्ययं भारतस्य चतुर्दिवसीय आधिकारिकयात्रायां ह्यः नवदिल्ल्याम् प्रत्यागतः अस्ति। डॉ. होल्नेस् इत्यस्य भारतस्य एषा प्रथमा यात्रा एव। स्व यात्रावधौ जमैकादेशस्य प्रधानमन्त्री राष्ट्रपति उपराष्ट्रपतिभ्यां च सह अपि मेलनं करिष्यति। सः श्वः काशीमपि गमिष्यति।

<u>अरुणाचल -सीतारामन</u>

केन्द्रीय वित्तमन्त्री निर्मला सीतारामणः प्रोक्तवती यत्, जनधनयोजनायाः कारणेन निर्धनानाम् लघुव्यापारिणां च कृते बैंकऋणं प्राप्तुं सुगम्यं जातम्। सा अद्य इटानगरे क्रेडिट् आउटरीच् इति कार्यक्रमे विविधसर्वकारीयोजनानां लाभार्थिभ्यः सम्बोधयन्ती आसीत्। श्रीमति सीतारामणः प्रकाशितवती यत् प्रधानमन्त्रिणा सुनिश्चितं यत् जनाः एताः योजनाः समाव्हानं विनैव प्राप्तुं शक्नुवन्ति। मन्त्रिणा बोधितं यत् ऋणप्रसारकार्यक्रमेण सर्वकारः पुनरावलोकनं कर्तुं शक्नोति यत् कल्याणकारीयोजनाः सामान्यजनानाम् यथार्थतया लाभं कुर्वन्ति वा इति।

<u>अगस्त-ऋणवृद्धिः</u>

भारतीय-रिजर्वबैङ्केन बैंकऋणस्य क्षेत्रीयनियोजनस्य मासिकदत्तांशः प्रकाशितः। ह्यः प्रकाशिताः दत्तांशाः दर्शयन्ति यत् कृषिः , तत्सम्बद्धानि च कार्याणि ऋणवृद्धिः च नैरन्तरं सुदृढाः अभवन्। अस्मिन् वर्षे अगस्तमासे गतवर्षस्य सापेक्षे सप्तदश दशमलव सप्त प्रतिशतं यावत् वृद्धिः जाता । उद्योगानां ऋणमपि अस्मिन् समये प्रायः दश प्रतिशतं वृद्धिः अभवत्। प्रमुख उद्योगेषु रसायनानां रासायनिकपदार्थानाम्, खाद्यप्रसंस्करणस्य, ईंधनस्य, आधारभूतसंरचनायाः च ऋणमपि अधिकम् जातम्।

**<u>सेनाप्रमुखः</u>**

सेनाप्रमुखः जनरल् उपेन्द्रद्विवेदी चीनदेशेन सह (LAC) इति वास्तविकनियन्त्रणरेखायाः स्थितिः स्थिरा अस्ति किन्तु सामान्यः नास्ति इति उक्तवान्। अद्य नवदिल्ल्यां चाणक्यरक्षासंवादे प्रवदन् सेनाप्रमुखः अवदत् यत् भारतं विंशत्यधिक द्विसहस्र तम वर्षस्य एप्रिल-मासात् पूर्वं यादृशी स्थितिः आसीत् तथैव पुनः स्थापितुम् इच्छति। जनरल उपेन्द्र द्विवेदी उक्तवान् यत्, यावत् एतत् पुनस्थापनं न भवति तावत् स्थितिः संवेदनशीला एव भविष्यति तथा च भारतं कस्याः अपि आकस्मिकस्थितेः सामु ख्यं कर्तुं पूर्णतया परिचालनात्मकरूपेण सज्मस्ति।

**<u>क्रिकेट्:</u>**

क्रिकेट्-क्रीडायां भारतेन बाङ्गलादेशस्य विरुद्धं द्वावपि क्रिकेट-निकष-स्पर्धा विजिता। अद्य अपराह्णे कानपुर-नगरे द्वितीये निकष-क्रीडायां भारतेन बांगलादेश: सप्त स्तोभैः पराजित:।

**<u>शूटिंग्:</u>**

पेरुदेशस्य लीमानगरे प्रचल्यमाणायां (ISSF) इति अन्ताराष्ट्रीयलक्ष्यभेद स्पर्धासङ्घस्य कनिष्ठविश्व प्रतिस्पर्धायां पुरुषाणां दश मीटर् परिमितायां एयर राइफल इत्यस्यां स्पर्धायां भारतस्य पार्थराकेश माने इत्यनेन द्वे स्वर्णपदके समर्जिते। दश मीटर् परिमिते एयर राइफल इति निज उपलब्धि ग्रहाणानन्तरं पार्थः अजय मलिक-, अभिनव शॉ इत्युभाभ्याम् सह मिलित्वा दश मीटर् एयर राइफल इति पुरुषाणां स्पर्धायां अन्यं स्वर्णपदकं संप्राप्तम्।

।। इति वार्ताः।।